षट्प्र० सभार्याःकोणपैःसार्धंचत्वारोदिशिदिश्यपि । संवत्सरस्थोभगवान्वागीरावयनस्थितौ । मासस्थितःसभगवा भाष्यं
॥ ५ ॥ न्पक्षयोर्वाक्कमारुतः। अहोरात्रेतुभगवान्प्राणोह्नयथचवाङ्निशि । दंपत्योर्भगवान्विष्णुर्भार्यास्थातुसरस्वती । प्र० ६
भर्तृस्थःसस्वयंवायुरेवंजानन्विमुच्यतइतिप्रजापतिसंहितायां ॥ प्रश्न०॥१॥ वायुरग्निरित्यत्रभूतवायुरुच्यते ।
प्राणशब्देनप्रधानवायुः ॥ प्रश्न०॥२॥ आत्मतः। परमात्मतः । विष्णोर्वायुःसमुत्पन्नोवायोःसर्वाश्चदेवताः ।
प्राणाद्यास्तान्नयन्प्राणआज्ञापयतिराजवत् । स्वयंचपंचरूपस्सन्दद्यान्मोक्षादिकंप्रभुरितिप्रभंजने ॥ प्रश्न०
॥३॥ रश्मीनामविशेषेपिह्यज्ञदृष्ट्यपेक्षया । सूर्यस्यमंडलंयांतीत्युच्यंतेतददर्शनात् । एवंविष्णोस्तुसामीप्या
द्देवानांसुप्तिगस्यतु । व्यवहाराकरत्वाच्चएकीभावइतीर्यतइतिच । भगवतःशरीरवत्साद्दश्ययुक्तेजीवेसुखंभव
ति । कस्यैतत्सुखंभवतीतिपृष्टत्वात् । नह्यचेतनस्यशरीरस्यसुखंभवति । यस्यात्माशरीरमितिचश्रुतिः।साद्द
श्याद्देहवज्जीवोविष्णोस्तस्यसुखंभवेत् । सुप्तौतस्यसुखार्थंहिभगवान्सुप्तिमानयेदितिच ॥प्रश्न०॥४॥ प्रणवेन
हरिंध्यायन्ब्रह्मलोकंसमेत्यच । ज्ञानंचतुर्मुखात्प्राप्यमुच्यतेनात्रसंशयः ॥ प्रश्न० ॥५॥ कर्मेतिपुष्करःप्रोक्तउ ॥६७५॥
षानामाभिमानिनी । लोकाभिमानीपर्जन्यःस्वाहावैमंत्रदेवता । तपोभिमानीवह्निश्चवरुणोवीर्यदेवता । अ

